संस्कृत वार्ता:

दिनाङ्क : 05/11/2026 सायम् : 06:20

<u>आदौ मुख्यवार्ता:</u>

- निर्वाचनायोगेन चतसृषु राज्येषु द्वयोः केन्द्रशासित-प्रदेशयोश्च मतदातृसूचीनां विशेष-संक्षिप्त-पुनरीक्षणस्य उद्घोषणा कृता ।
- प्रधानमन्त्रिणा नरेन्द्र-मोदिना अद्य षड्विंशत्यधिक-द्विसहस्रतमस्य नव-दिल्ल्यां एशियाई-पैरा-क्रीडायां भागं निर्व्यूढवता भारतीय-क्रीडक-दलेन सह विहितः प्रत्यक्ष-संवादः ।
- भारतेन गयाना-देशे मार्ग-स्वास्थ्य-रक्षा-परियोजनाभ्यः पञ्चशत-मिलियन-डॉलर-परिमितस्य ऋण-साहाय्यस्य कृता उद्घोषणा।
- तटीयान्ध्रप्रदेशे, दक्षिण-आन्तरिक-कर्णाटके, तमिलनाडु-राज्ये केरले च रविवासरं यावत् धारासम्पातवृष्टेः भारतीय-ऋतु-विज्ञान-विभागेन प्रकटितं पूर्वानुमानम् ।
- युवा-ओलम्पिक्-क्रीडासु तन्वी-पत्री इत्यनया महिला-बैडमिण्टन्-स्पर्धायाः अन्तिम-चक्रे स्थानमवाप्य रचितः इतिहासः।

<u>निर्वाचनायोगः</u>

भारतीय-निर्वाचनायोगेन अरुणाचलप्रदेशे, चण्डीगढे, दादरा-नगरहवेली-दमन-दीवक्षेत्रे, मिज़ोरमराज्ये, ओडिशायां सिक्किमे च मतदातृ-सूचीनां विशेष-संक्षिप्त-पुनरीक्षणस्य घोषणा कृता। एतदर्थं सप्तविंशत्यधिक-द्विसहस्रतमवर्षस्य जनवरी-मासस्य प्रथम-दिनाङ्कः पात्रता-तिथित्वेन उद्घोषितः।

आयोगानुसारम्, मतदान-केन्द्राणां युक्तीकरणस्य पुनर्व्यवस्थायाश्च कार्यम् अस्यैव मासस्य विंशति-दिनाङ्कं यावत् सम्पूर्तिमेष्यति। अथ च एकीकृत-प्रारूप-मतदातृ-सूचीनां प्रकाशनं नवम्बरमासस्य त्रिंशद्दिनाङ्के विधास्यते। आक्षेपाणां च पञ्जीकरण-कालः नवम्बरमासस्य त्रिंशद्दिनाङ्कात् दिसम्बरमसस्य त्रिंशद्दिनाङ्कपर्यन्तं भविष्यति। प्राप्तानां समग्राक्षेपाणां

निस्तारणम् आगामी-वर्षस्य जनवरी-मासस्य अष्टादश-दिनाङ्कं यावत् सम्पादयिष्यते। तदनन्तरं संशोधित-मतदातृ-सूचीनाम् अन्तिम-प्रकाशनं सप्तविंशत्यधिक-द्विसहस्रतमवर्षस्य जनवरी-मासस्य एकविंशति-दिनाङ्के भविष्यति।

प्रधानमन्त्री-पैराक्रीडा

प्रधानमन्त्री नरेन्द्रमोदी नवदिल्ल्याम् षड्विंशत्यधिक-द्विसहस्रतमस्य एशियाई-पैरा-क्रीडायां भागं गृहीतवद्भिः भारतीय-क्रीडक-दलस्य सदस्यैः सह सम्भाषणम् अकरोत्।

जपानस्य आइची-नागोया-नगरे अस्मिन् वर्षे आयोजितासु एशियाई-पैरा-क्रीडासु भारतेन स्वकीयम् अद्यावधि-पर्यन्तं सर्वोत्कृष्टं प्रदर्शनं पञ्जीकृतम्। आहत्य सप्तनवतिः भारतीय-पैरा-क्रीडकाः चतुर्दशाधिक-शतं पदकानि विजितवन्तः, येषु त्रिंशत् स्वर्ण-पदकानि, पञ्चत्रिंशत् रजत-पदकानि, नवचत्वारिंशत् कांस्य-पदकानि च समाविष्टानि सन्ति।

अस्मिन् भव्य-समारोहे पदक-विजेतारः क्रीडकाः, प्रशिक्षकाः, भारतीय-पैरालम्पिक्-समित्याः भारतीय-ओलम्पिक्-सङ्घस्य च अधिकारिणः, राष्ट्रिय-क्रीडा-महासंघानां प्रतिनिधयः, अथ च युवकार्य-क्रीडा-मन्त्रालयस्य उच्चाधिकारिणः उपस्थिताः आसन्।

प्रधानमन्त्रिणा नरेन्द्र-मोदिना अद्य सायं जापान-देशस्य ऐचि-नागोया-नगरे सम्पन्नायाम् एशियाई-पैरा-क्रीडायां उत्कृष्ट-प्रदर्शनं कृतवतां भारतीय-पैरा-क्रीडकानां दलेन सह साक्षात् अभिनन्दनं विधीयते। अस्मिन् सम्भाषणे तेन प्रतिपादितं यत् भारतं जागतिक-स्तरे एकस्याः प्रमुख-क्रीडा-शक्तेः रूपेण समुदेति ।

मोदिना उक्तं यत् एतैः पैरा-क्रीडकैः पुनरेकवारं दर्शितं यत् असाधारण-सिद्ध्यः केवलं दृढ-सङ्कल्पेन, साहसेन, अविरत-परिश्रमेण च लभ्यन्ते । तेषां कीर्तिमानैः अशेषः देशः सम्मोदते ।

भारत-गयानासाहाय्यम्

विदेशमन्त्री डॉ.एस.जयशङ्करः एन्टिग्वा-एण्ड-बारबुडा-देशे गयाना-देशस्य राष्ट्रपतिना डॉ. मोहम्मद-इरफान-अली-महोदयेन सह द्विपक्षीय-चर्चाम् अकरोत्। अस्मिन् मेलने भारतेन गयाना-देशाय मार्ग-स्वास्थ्य-रक्षा-क्षेत्राणां परियोजनाभ्यः पञ्चशत-मिलियन-डॉलर्-परिमितस्य ऋण-विस्तारस्य घोषणा कृता। उभौ नेतारौ व्यापार-निवेश-ऊर्जा-कृषि-आधारभूतसंरचना-विकास-अङ्कीयप्रौद्योगिकी-क्षमतावर्धन-सहितेषु परस्पर-हित-सम्बद्धेषु सहयोगस्य सुदृढ़ीकरणाय उपायान् चर्चितवन्तौ।

विदेश-मन्त्रालयेन सामाजिक-सञ्चारपटले संसूचितं यत् भारतेन पूर्वमेव गयाना-देशे बह्व्यः विकास-परियोजनाः सफलीकृताः, अथ च अनेन नूतनेन ऋण-विस्तारेण द्वयोः देशयोः मध्ये विकास-सहभागिता अधिका सुदृढा भविष्यति। अस्मिन् अवसरे द्वयोः देशयोः मध्ये त्रयः अनुबन्धाः हस्ताक्षारिताः, येषु सूक्ष्म-लघु-उद्योगेभ्यः उत्पादन-प्रकल्पानाम् आपूर्तिः संस्थापनं च, अथ च त्वरित-प्रभाव-परियोजनानां क्रियान्वयनार्थम् अनुदान-साहाय्यं समाविष्टम् अस्ति।

शाह-हरियाणा

केन्द्रीय-गृहमन्त्रिणा अमित-शाहेन अद्य हरियाणा-राज्यस्य करनाल-नगरे भारतीय-जनता-दलस्य 'लोकतंत्र-रक्षण, अराजकता-समाप्तीति अभियानस्य अन्तर्गतं आयोजितायाः पदयात्रायाः नेतृत्वं विधीयते।

यात्रायाः प्रारम्भात् प्राक् जनसमूहं सम्बोधयन् श्रीशाहः ब्रूते यत् लोकतन्त्रे संसद् चर्चायाः सर्वोच्चं मञ्चं वर्तते; परं कांग्रेस-दलस्य नेता राहुल-गांधी न तु संसदः कार्यं प्रचालयति, न च संसद्-चर्चासु भागं गृह्णाति।

हरियाणा-राज्ये आयोजिते अस्मिन् समारोहे केंद्रीय-ऊर्जा-मन्त्री मनोहर-लालः, मुख्यमन्त्री नायब-सिंह-सैनी-, विधानसभाध्यक्षः हरविन्दर-कल्याणः, भारतीय-जनता-दलस्य प्रदेशाध्यक्षा डा. अर्चना-गुप्ता, हरियाणा-सर्वकारस्य अन्ये बहवः मन्त्रिणश्च सोत्साहं भागं भजन्ते ।

भारतीय-ऋतु-विज्ञान-विभागेन

भारतीय-ऋतु-विज्ञान-विभागेन रविवासरं यावत् तटीय-आन्ध्र-प्रदेशे, दक्षिण-आन्तरिक-कर्नाटके, तमिलनाडु-राज्ये, केरले च अति-वृष्टेः पूर्वानुमानं प्रकाश्यते ।

ऋतुविभागः अनुमिमीते यत् आगामी-द्वि-त्रि-दिनेषु ओडिशायाम्, तटीय-कर्नाटके, केरले, माहे-क्षेत्रे, तमिलनाडु-राज्ये, पुदुच्चेरी-कराईकल-क्षेत्रयोः च विद्युत्-निघोषैः तीव्र-झञ्झावातेन च सह महती वृष्टिः प्रवर्तिष्यते।

पञ्जाब-जनसङ्ख्या-गणनायाः

पञ्जाब-राज्ये जनसङ्ख्या-गणनायाः द्वितीयं चरणम् आगामी-मासस्य प्रथमदिनाङ्कात् सप्तविंशत्युत्तरद्विसहस्रतमवर्षस्य जनवरी-मासस्य चतुर्थ-दिनाङ्कं यावत् सम्पद्यते। अस्याः गणनायाः पुनरीक्षण-चरणं आगामिवर्षस्य जनवरी-मासस्य नवम-दिनाङ्कं यावत् विधीयते।

राज्यस्य विशेष-प्रभार-क्षेत्राणां नोडल-अधिकारिणां कृते एकस्य समीक्षोपवेशनस्य आयोजनं क्रियते, यत्र नागरिक-गणनाधिकारिणां प्रवेशो नियन्त्रितो वर्तते, तादृश क्षेत्रेषु सुरक्षिततया, समयबद्धतया च गणनायाः निष्पादनं सुनिश्चितं क्रियते। अस्यां चर्चायाम् अधिकारिणां निकषा समन्वयः प्रवर्धते, येन निर्धारित-समयानुगुणं कार्यक्रमानां सम्पन्नता सिध्यते।

चण्डीगढ़-क्षेत्रे जनवरी-मासस्य दशमात् चतुर्विंशति-दिनाङ्कं यावत् स्व-गणना सञ्चालिष्यते। ततः परं मार्च-मासस्य प्रथमात् पञ्चम-दिनाङ्कं यावत् पुनरीक्षणचरणमपि सम्पादयिष्यते।

युव-ओलम्पिक्-स्पर्धा

सेनेगल-देशस्य डकार-नगरे सम्पद्यमानायां युव-ओलम्पिक्-स्पर्धायां युव-बैडमिण्टन्-क्रीडिकया तन्वी-पत्री इत्यनया इतिहासः रच्यते। सा अस्याः स्पर्धायाः महिला-एकल-वर्गस्य अन्तिम-चरणं प्रविष्टा प्रथमा भारतीय-क्रीडिका वर्तते। तन्वी चतुःपञ्चाशत्-निमेषात्मक-कठोर-सङ्घर्षे जापान-

देशस्य युजुनो-वातानाबे इत्येतां एकविंशतिः - चतुर्दश, एकादश - एकविंशतिः , एकविंशतिः - नवदश इत्येतेन अंकान्तरालेन पराजित्य उपाधि-स्पर्धायां स्व-स्थानं लब्धवती। इतः प्राक् अपि सा थाईलैण्ड-देशस्य कुङ्कौ-ककानिक् इत्येतां पराभूय उपान्त्यचरणं प्रविष्टा प्रथमा भारतीय-नारी अभवत्।

।। इति वार्ता: ।।